# भज गोविन्दम्

भज गोविन्दं भज गोविन्दम्
गोविन्दं भज मूढमते ।
संप्राप्ते सन्निहिते काले
न हि न हि रक्षति डुकृन् करणे ॥
भज गोविन्दं ... (1)

मूढ जहीहि धनागम तृष्णां
कुरु सद्बुद्धिं मनसि वितृष्णां ।
यल्लभसे निजकर्मोपात्तं
वित्तं तेन विनोदय चित्तं ॥
भज गोविन्दं (2)

नारीस्तनभर नाभीदेशं
दृष्ट्वा मा गा मोहावेशं ।
एतन्मांस वसादि विकारं
मनसि विचिन्तय वारं वारं ॥
भज गोविन्दं (3)

नळिनीदल गत जलमति तरलं
तद्वज्जीवित मतिशय चपलं ।
विद्धि व्याध्यभिमान ग्रस्तं
लोकं शोकहतं च समस्तं ॥
भज गोविन्दं (4)

यावद्वित्तोपार्जनसक्तः
तावन्निज परिवारो रक्तः ।
पश्चाज्जीवति जर्जरदेहे
वार्तां कोऽपि न पृच्छति गेहे ॥
भज गोविन्दं (5)

यावत्पवनो निवसति देहे
तावत्पृच्छति कुशलं गेहे ।
गतवति वायौ देहापाये
भार्या बिभ्यति तस्मिन् काये ॥
भज गोविन्दं (6)

बालस्तावत् क्रीडासक्तः
तरुणस्तावत् तरुणीसक्तः ।
वृद्धस्तावत् चिंतासक्तः
परमे ब्रह्मणि कोपि न सक्तः ॥
भज गोविन्दं (7)

का ते कांता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः ।
कस्य त्वं कः कुत आयातः
तत्त्वं चिन्तय तदहि भ्रातः ॥
भज गोविन्दं (8)

सत्संगत्वे निस्संगत्वं
निस्संगत्वे निर्मोहत्वं ।
निर्मोहत्वं निश्चलतत्त्वं
निश्चलतत्त्वे जीवन मुक्तिः ॥
भज गोविन्दं (9)

वयसि गते कः कामविकारः
शुष्के नीरे कः कासारः ।
क्षीणे वित्ते कः परिवारो
ज्ञाते तत्त्वे कः संसारः ॥
भज गोविन्दं (10)

मा कुरु धन जन यौवन गर्वं
हरति निमेषात्कालः सर्वं ।
मायामयं इदं अखिलं बुद्ध्वा
ब्रह्मपदं त्वं प्रविश विदित्वा ॥
भज गोविन्दं (11)

दिनयामिन्यौ सायं प्रातः
शिशिर वसंतौ पुनरायातः
कालः क्रीडति गच्छत्यायुः
तदपि न मुंचत्याशावायुः ॥
भज गोविन्दं (12)

का ते कांता धन गत चिंता
वातुल किं तव नास्ति नियंता ।
त्रिजगति सज्जन संगतिरेका
भवति भवार्णव तरणे नौका ॥
भज गोविन्दं (13)

जटिलो मुण्डी लुंचित केशः
काषायांबर बहु कृत वेषः ।
पश्यन्नपि च न पश्यति मूढो
ह्युदर निमित्तं बहु कृत वेषः ॥
भज गोविन्दं (14)

अंगं गलितं पलितं मुण्डं
दशनविहीनं जातं तुण्डं ।
वृद्धो याति गृहीत्वा दण्डं
तदपि न मुंचत्याशापिण्डं ॥
भज गोविन्दं (15)

अग्रे वन्हि पृष्ठे भानू
रात्रौ चुबुक समर्पित जानुः ।
करतल भिक्षस्तरुतलवासः
तदपि न मुंचत्याशापाशः ॥
भज गोविन्दं (16)

कुरुते गंगा सागर गमनं
व्रत परिपालनं अथवा दानं ।
ज्ञानविहीनः सर्वमतेन
भजति न मुक्तिं जन्मशतेन ॥
भज गोविन्दं (17)

सुर मंदिर तरुमूल निवासः
शय्या भूतलं अजिनं वासः ।
सर्वपरिग्रह भोग त्यागः
कस्य सुखं न करोति विरागः ॥
भज गोविन्दं(18)

योगरतो वा भोगरतो वा
संगरतो वा संगविहीनः ।
यस्य ब्रह्मणि रमते चित्तं
नंदति नंदति नंदत्येव ॥
भज गोविन्दं (19)

भगवदगीता किंचितधीता
गंगाजल लवकणिकापीता ।
सकृदपि येन मुरारिसमर्चा
क्रियते तस्य यमेन न चर्चा ॥
भज गोविन्दं ... (20)

पुनरपि जननं पुनरपि मरणं
पुनरपि जननी जठरे शयनं ।
इह संसारे बहुदुस्तारे
कृपयाऽपारे पाहि मुरारे ॥
भज गोविन्दं ॥ 21 ॥

रथ्याचर्पट विरचित कंथः
पुण्यापुण्य विवर्जित पंथः ।
योगी योगनियोजित चित्तो
रमते बालोन्मत्तवदेव ॥
भज गोविन्दं ॥ 22 ॥

कस्त्वं कोऽहं कुत आयातः
का मे जननी को मे तातः ।
इति परिभावय: सर्वमसारं
विश्वं त्यक्त्वा स्वप्न विचारं ॥
भज गोविन्दं (23)

त्वयि मयि चान्यत्रैको विष्णुः
व्यर्थं कुप्यसि मय्यसहिष्णुः ।
भव समचित्तः सर्वत्र त्वं
वांछस्याचिराद्यदि विष्णुत्वं ॥
भज गोविन्दं (24)

शत्रौ मित्रे पुत्रे बंधौ
मा कुरु यत्ने विग्रहसंधौ ।
सर्वस्मिन्नपि पश्यात्मानं
सर्वत्रोत्सृज भेदाज्ञानं ॥
भज गोविन्दं (25)

कामं क्रोधं लोभं मोहं
त्यक्त्वाऽऽत्वानं पश्यति सोऽहं ।
आत्मज्ञानविहीना मूढाः
ते पच्यंते नरकनिगोढाः ॥
भज गोविन्दं (26)

गेयं गीतानाम सहस्त्रं
ध्येयं श्रीपति रूपं अजस्त्रं ।
नेयं सज्जन संगे चित्तं
देयं दीनजनाय च वित्तं ॥
भज गोविन्दं (27)

सुखतः क्रियते रामाभोगः
पश्चाद्धंत शरीरे रोगः ।
यद्यपि लोके मरणं शरणं
तदपि न मुंचति पापाचरणं ॥
भज गोविन्दं (28)

अर्थं अनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यं ।
पुत्रादपि धनभाजां भीतिः
सर्वत्रैषा विहिताः रीतिः ॥
भज गोविन्दं (30)

प्राणायामं प्रत्याहारं
नित्यानित्य विवेकाविचारं ।
जाप्य समेत समाधि विधानं
कुर्ववधानं महदवधानं ॥
भज गोविन्दं (31)

गुरुचरणांबुज निर्भर भक्तः
संसारादचिराद्भव मुक्तः
सेन्द्रिय मानस नियमा देवं
द्रक्ष्यसि निज हृदयस्थं देवं ॥
भज गोविन्दं (32)

सर्वे भवंतु सुखिनः
सर्वे संतु निरामयाः ।
सर्वे भद्राणि पश्यंतु
मा कश्चिद् दुःखभाग् भवेत् ॥